नवच्छात्रः, पुं, (नवो नूतनश्छात्रः ।) प्रथममध्ययने प्रवृत्तः । नवीनविद्यार्थी । तत्पर्य्यायः । क्रियाकारः २ । इति त्रिकाण्डशेषः ॥

नवतः, पुं, (नूयते स्तूयते इति । नु+बाहुलकात् अतच् ।) कुथः । करिकम्बलः । इति हेमचन्द्रः । ३ । ३४४ ॥

नवतिः, स्त्री, (नव दशतः परिमाणमस्य । "पङ्क्तिविंशतित्रिंशदिति ।" ५ । १ । ५९ । इति निपातनात् साधुः ।) संख्याविशेषः । इति शब्दरत्नावली । ९० नब्बइ इति भाषा ॥ (यथा, रघुः । ३ । ६९ ।

"इति क्षितीशो नवतिं नवाधिकां
महाक्रतूनां महनीयशासनः ।
समारुरुक्षुर्दिवमायुषः क्षये
ततान सोपानपरम्परामिव ॥"

नवतिसंख्यान्विते च । यथा, मनुः । ३।१७१ ।

"वीथ्यान्धो नवतेः काणः षष्टेः श्वित्री शतस्य तु ।
पापरोगी सहस्रस्य दातुर्नाशयते फलम् ॥")

नवतिका, स्त्री, (नवं नूतनं तैकते करोतीति । तिक+कः । टाप् ।) तूलिका । इति हारावली । १३७ ॥ (नवतिरेव । स्वार्थे कः । तत्टाप् । नवतिसंख्या ॥)

नवतिशः, [स्] अ, बहुनवति । नवति नवतीति वीप्सायां चशसृप्रत्ययः ॥

नवती, स्त्री, (नवतिः+कृदिकारादिति वा ङीष् ।) नवतिः । इति शब्दरत्नावली ॥

नवदण्डं, क्ली, (नवो दण्डो नव दण्डा वा यत्र ।) राज्ञां छत्रविशेषः । यथा, युक्तिकल्पतरुः ।

"मनोहरं त्रिकनकदण्डञ्च नवदण्डकम् ।
छत्रञ्चत्रिविधं ज्ञेयं त्रिविधानां महीभुजाम् ॥"

अस्य विवरणं छत्रशब्दे द्रष्टव्यम् ॥

नवदलं, क्ली, (नवं दलमिति कर्म्मधारयः ।) पद्मस्य केशरसमीपस्थदलम् । पद्मादीनां जटिकाकारनवपत्रम् । तत्पर्य्यायः । संवर्त्तिका २ । इत्यमरः । १ । १० । ४३ ॥ संवर्त्तिः ३ संवर्त्ती ४ । इति भरतः ॥ सामान्यनूतनपत्रम् । इति हेमचन्द्रः ॥ दलमात्रम् । इति मधुः ॥

नवदीधितिः, पुं, (नव दीधितयः किरणानि यस्य ।) मङ्गलग्रहः । इति जटाधरः ॥

नवदुर्गा, स्त्री, (नवसंख्यान्विता दुर्गा ।) नवपत्रिका । (यदुक्तम् ।

"कदली दाड़िमी धान्यं हरिद्रा मानकं कचु ।
बिल्वाशोकौ जयन्ती च विज्ञेया नवपत्रिका ॥")

यथा, हहन्नन्दिकेश्वरपुराणे ।

"पत्रिके नवदुर्गे त्वं महादेवमनोरमे ।
पूजां समस्तां संगृह्य रक्ष मां त्रिदशेश्वरि ! ॥"

कुमारिका १ त्रिमूर्त्तिः २ कल्याणी ३ रोहिणी ४ काली ५ चण्डिका ६ शाम्भवी ७ दुर्गा ८ भद्रा ९ इति नवनामिका कन्या । यथा,—

"मन्त्राक्षरमयीं लक्ष्मीं मातृणां रूपधारिणीम् ।
नवदुर्गात्मिकां साक्षात् कन्यामावाहयाम्यहम् ॥"

इति निर्णयसिन्धुः ॥

नवदोला, स्त्री, (नवा नूतना दोला ।) नूतनप्रेङ्खा । अस्या विवरणं चतुर्द्दोलशब्दे द्रष्टव्यम् ॥ तदारोहणादिनं यथा,—

"उपेन्द्रमूलादितिशिदामित्रर्क्षे
शक्रेन्दुताराति थिलग्नयोगे ।
विदिक्षमायुग्मयमाहवर्ज्जं
दोलादिकारोहणमाद्यमिष्टम् ॥"

इति समयप्रदीपः ॥

नवधा, अ, (नव+प्रकारे धाच् ।) नवप्रकारः । यथा,—

"आचारो विनयो विद्या प्रतिष्ठा तीर्थदर्शनम् ।
निष्ठा वृत्तिस्तपो दानं नवधा कुललक्षणम् ॥"

नवनाड़ीचक्रं, क्ली, (नवनवचतुष्कं नाड़ीचक्रम् ।) राशौ नवनवमयुक्तवक्ररेखात्मकयात्मकचक्रम् । यथा, ज्योतिषतत्त्वे ।

"जन्माद्यं कर्म्म ततोऽपि दशमं सांघातिकं षोड़शभम् ।
समुदयमष्टादशभं विनाशसंज्ञं त्रयोविंशम् ॥
जाथः स्युः पञ्चविंशं मानसमेवं नरः षड़्ऋक्षः स्यात् ।
नवनक्षत्री नृपतिः स्वजातिदेशाभिषिक्तश्च ॥"

नवनी, स्त्री, (नवं नीयते इति । नी+डः । गौरादित्वात् ङीष् ।) नवनीतम् । यथा,—

"अहो हैयङ्गवीनानां नवनीनां परं सुदा ।
लड्डुकानां शर्कराणां स्वस्तिकानाञ्च यत्नतः ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ४५ अध्यायः ॥

नवनीतं, क्ली, (नवं नीयतेऽनेनेति । नी+क्तः ।) गव्यविशेषः । माखन् इति ननी इति च भाषा । तत्पर्य्यायः । नवोद्धृतम् २ । इत्यमरः । २ । ९ । ५२ ॥ सरजम् ३ मन्थजम् ४ हैयङ्गवीनम् ५ । इति रत्नमाला ॥ दधिजम् ६ सारम् ७ हैयङ्गवीनकम् ८ । अस्य सामान्यगुणाः । शीतलत्वम् । वर्णबलावहत्वम् । सुमधुरत्वम् । हृद्यत्वम् । संग्राहकत्वम् । कफवर्द्धकारकत्वम् । वातसर्व्वाङ्गशूलकासश्रमनाशित्वम् । सुखकरत्वम् । कान्तिपुष्टिप्रदत्वम् । चक्षुष्यत्वम् । सर्व्वदोषापहरत्वञ्च ॥ * ॥ नवोद्भवगव्यमाहिषनवनीतगुणाः । बालवृद्धानां प्रशस्तत्वम् । बलकारित्वम् । वातवर्द्धनत्वञ्च ॥ * ॥ माहिषनवनीतगुणाः । कषायत्वम् । मधुरत्वम् । शीतलत्वम् । हृद्यत्वम् । बल्यत्वम् । ग्राहित्वम् । पित्तघ्नत्वम् । सुन्दरत्वञ्च ॥ * ॥ छागनवनीतगुणाः । क्षयकासनेत्रामयकफनाशित्वम् । बल्यत्वम् । दीपनत्वञ्च ॥ * ॥ आविकनवनीतगुणाः । हिमत्वम् । लघुत्वम् । योनिशूले कफे वाते गुदशूले हितत्वञ्च ॥ * ॥ ऐड़कनवनीतगुणाः । विदाहत्वम् । शीतलत्वम् । मेधानाशित्वम् । गुरुत्वम् । पुष्टिशौत्यकारित्वम् । मन्दाग्निदीपनत्वञ्च ॥*॥ हस्तिनीनवनीतगुणाः। कषायत्वम् । शीतलत्वम् । लघुत्वम् । तिक्तत्वम् । विष्टम्भित्वम् । जन्तुपित्तकफलमिनाशित्वञ्च ॥ * ॥ अश्वीनवनीतगुणाः । कषायत्वम् । कफवातनाशित्वम् । चक्षुष्यत्वम् । कटुत्वम् । उष्णत्वम् । ईषद्दाहापहारकत्वञ्च ॥ गर्द्दभीनवनीतगुणाः । कषायत्वम् । कफवातनाशित्वम् । बल्यत्वम् । दीपनत्वम् । पाके लघुत्वम् । मूत्रदोषनाशित्वञ्च ॥ * ॥ औष्ट्रनवनीतगुणाः । पाके शीतलत्वम् । व्रणक्रिमिकफाख्यवातनाशित्वञ्च ॥ * ॥ नारीनवनीतगुणाः । हृद्यत्वम् । पाके लघुत्वम् । चक्षुष्यत्वम् । दीपनत्वम् । सर्व्वरोगविषनाशित्वञ्च ॥ * ॥

अथ साधारणनवनीतगुणाः ।

"शीतं हृद्यनवोद्धृतं सुमधुरं हृद्यञ्च वातापहं कासघ्नं क्रिमिनाशनं कफहरं संग्राहि शूलापहम् ।
बल्यं पुष्टिकरं क्षयार्त्तिशमनं सन्तापविच्छेदनं चक्षुष्यं श्रमहारि तर्पणकरं दध्युद्भवं पित्तजित् ॥
एकाहाध्युषितं प्रोक्तमुत्तरोत्तरगन्धदम् ।
अरुच्यं सर्व्वरोगाढ्यं दाधकं तद्धितं स्मृतम् ॥"

इति राजनिर्घण्टः ॥

अपि च । गव्यनवनीतगुणाः ।

"नवनीतं हितं गव्यं वृष्यं वर्णबलाग्निकृत् ।
संग्राहि वातपित्तासृक् क्षयार्शोऽर्द्दितकासहृत् ॥
तद्धितं बालके वृद्धे विशेषादमृतं शिशोः ॥" * ॥

माहिषनवनीतगुणाः ।

"नवनीतं महिष्यास्तु वातश्लेष्मकरं गुरु ।
दाहपित्तश्रमहरं मेदःशुक्रविवर्द्धनम् ॥"

अथ पयसो नवनीतस्य गुणाः ।

"दुग्धोत्थं नवनीतन्तु चक्षुष्यं रक्तपित्तनुत् ।
वृष्यं बल्यमतिस्निग्धं मधुरं ग्राहि शीतलम् ॥"

अथ सद्यःसमुद्भवनवनीतगुणाः ।

"नवनीतञ्च सद्यस्कं स्वादु ग्राहि हिमं लघु ।
मेध्यं किञ्चित् कषायाम्लमीषत्तक्रांशसंक्रमात् ॥"

अथ चिरन्तननवनीतगुणाः ।

"सक्षारकटुकाम्लत्वाच्छर्द्यर्शःकुष्ठकारकम् ।
श्लेष्मलं गुरुमेदस्यं नवनीतं चिरन्तनम् ॥"

इति भावप्रकाशः ॥

"नवनीतं नवं वृष्यं ग्राहि वर्णबलाग्निकृत् ।
चक्षुष्यं हृदयं स्निग्धं ग्रहण्यर्शोविकारनुत् ॥
क्षीरोत्थितं हिमं ग्राहि रक्तपित्ताक्षिरोगनुत् ॥"

इति राजवल्लभः ॥

नवनीतकं, क्ली, (नवनीतात् कायति प्रकाशते इति । कै+कः ।) घृतम् । इति राजनिर्घण्टः ॥ (नवनीत+स्वार्थे कन् । नवनीतम् । यथा, हारीते चिकित्सितस्थाने १० अध्याये ।

"सर्पिः प्रयुक्तं नवनीतकञ्च ॥"

पर्य्यायोऽस्य यथा,—

"म्रक्षणं सरजं हैयङ्गवीनं नवनीतकम् ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)

नवनीतधेनुः, स्त्री, (नवनीतेन कृता धेनुः । मध्यपदलोपिकर्म्मधारयः ।) दानार्थकल्पितनवनीतमयधेनुविशेषः । यथा,—

"नवनीतमयीं धेनुं शृणु राजन् ! प्रयत्नतः ।
यां श्रुत्वा सर्व्वपापेभ्यो मुच्यते नात्र संशयः ॥
गोमयेनानुलिप्तायां भूमौ गोचर्म्ममात्रतः ।